"द्वादशस्वपि मासेषु कार्त्तिकः कृष्णवल्लभः ।
तस्मिन् संपूजितो विष्णुरल्पकैरप्युपायनैः ॥
ददाति वैष्णवं लोकमित्येवं निश्चितं मया ।
यथा दामोदरो भक्तवत्सलो विदितो जनैः ॥
तस्यायन्तादृशो मासः स्वल्पमप्युरुकारकः ।
दुर्लभो मानुषो देहो देहिनां क्षणभङ्गुरः ॥
तत्रापि दुर्लभः कालः कार्त्तिको हरिवल्लभः ।
दीपेनापि हि यत्रासौ प्रीयते हरिरीश्वरः ॥
सुगतिञ्च ददात्येव परदीपप्रबोधनात्" ॥ * ॥

अथ व्रतमाहात्म्यं स्कान्दे तत्रैव ।

"व्रतानामिह सर्व्वेषामेकजन्मानुगं फलम् ।
कार्त्तिके तु व्रतस्योक्तं फलं जन्मशतानुगम् ॥
अक्रूरतीर्थे विप्रेन्द्र ! कार्त्तिक्यां समुपोष्य च ।
स्नात्वा यत् फलमाप्नोति तत्कृत्वा वैष्णवं व्रतम् ॥
वाराणस्यां कुरुक्षेत्रे नैमिषे पुष्करेऽर्ब्बुदे ।
गत्वा यत् फलमाप्नोति व्रतं कृत्वा तु कार्त्तिके ॥
अनिष्ट्वा च सदा यज्ञैर्न कृत्वा पितृभिः स्वधाम् ।
व्रतेन कार्त्तिके मासि वैष्णवन्तु पदं व्रजेत् ॥
प्रवृत्तानाञ्च भक्ष्याणां कार्त्तिके नियमे कृते ।
अवश्यं कृष्णरूपत्वं प्राप्यते मुक्तिदं शुभम्" ॥

किञ्च ।

"ब्राह्मणः क्षत्त्रियो वैश्यः शूद्रो वा मुनिसत्तम ! ।
वियोनिं न व्रजत्येव व्रतं कृत्वा तु कार्त्तिके" ॥

किञ्च ।

"कार्त्तिके मुनिशार्दूल ! स्वशक्त्या वैष्णवं व्रतम् ।
यः करोति यथोक्तन्तु मुक्तिस्तस्य करे स्थिता ॥
सुपुण्ये कार्त्तिके मासि देवर्षिपितृसेविते ।
क्रियमाणे व्रते नृणां स्वल्पेऽपि स्यान्महाफलम्" ॥*॥

अथ कर्म्मविशेषमाहात्म्यम् । स्कान्दे तत्रैव ।

"दानं दत्तं हुतं जप्तं तपश्चैव तथा कृतम् ।
तदक्षयफलं प्रोक्तं कार्त्तिके च द्विजोत्तम" ! ॥

किञ्च ।

"यत् किञ्चित् कार्त्तिके दत्तं विष्णुमुद्दिश्य मानवैः ।
तदक्षयं लभ्यते वै अन्नदानं विशेषतः" ॥

किञ्च ।

"यस्तु सम्वत्सरं पूर्णमग्निहोत्रमुपासते ।
कार्त्तिके स्वस्तिकं कृत्वा सममेतन्न संशयः ॥
कार्त्तिके या करोत्येवं केशवालयमण्डलम् ।
स्वर्गस्था शोभते सा तु कपोती पक्षिणी यथा ॥
यः करोति नरो नित्यं कार्त्तिके पत्रभोजनम् ।
न स दुर्गतिमाप्नोति यावदिन्द्राश्चतुर्द्दश ॥
जन्मप्रभृति यत्पापं मानवैश्च कृतं भवेत् ।
तत्सर्व्वं नाशमाप्नोति ब्रह्मपत्रेषु भोजनात् ॥
सर्व्वकामफलं तस्य सर्व्वतीर्थफलं लभेत् ।
न चापि नरकं पश्येत्ब्रह्मपत्रेषु भोजनात् ॥
ब्रह्म चैष स्मृतः साक्षात् पलाशः सर्व्वकामदः ।
मध्यमं वर्ज्जितं पत्रं शूद्रस्य मुनिसत्तम ! ॥
भुञ्जन्नरकमाप्नोति यावदिन्द्राश्चतुर्द्दश ।
तिलदानं नदीस्नानं सत्कथा साधुसेवनम् ॥
भोजनं ब्रह्मपत्रेष कार्त्तिके मुक्तिदायकम् ।
जागरं कार्त्तिके मासि यः करोत्यरुणोदये ॥
दामोदराग्रे विप्रेन्द्र ! गोसहस्रफलं लभेत् ! ।

जागरं पश्चिमे यामे यः करोति महामुने ! ॥
कार्त्तिके सन्निधौ विष्णोस्तत्पदं करसंस्थितम् ।
साधुसेवा गवां ग्रासः कथा विष्णोरथार्च्चनम् ।
जागरः पश्चिमे यामे दुर्लभः कार्त्तिके कलौ" ॥

किञ्च ।

"जलधेनुसहस्रस्य वृषसंस्थे दिवाकरे ।
तोयं दत्त्वा यदाप्नोति स्नानं कृत्वा तु कार्त्तिके ॥
सन्निहत्यां कुरुक्षेत्रे राहुग्रस्ते दिवाकरे ।
सूर्य्यवारेण यत्स्नानं तदेकाहेन कार्त्तिके ॥
पितृनुद्दिश्य यद्दत्तं कार्त्तिके कृष्णवल्लभे ।
अन्नोदकं मुनिश्रेष्ठ ! अक्षयं जायते नृणाम्" ॥*॥

किञ्च ।

"गीतशास्त्रविनोदेन कार्त्तिकं यो नयेन्नरः ।
न तस्य पुनरावृत्तिर्मया दृष्टा कलिप्रिय !" ॥

किञ्च ।

"प्रदक्षिणञ्च यः कुर्य्यात् कार्त्तिके विष्णुसद्मनि ।
पदे पदेऽश्वमेधस्य फलभागी भवेन्नरः ॥
गीतं वाद्यञ्च नृत्यञ्च कार्त्तिके पुरतो हरेः ।
यः करोति नरो भक्त्या लभते चाक्षयं फलम् ॥
हरेर्नाम सहस्राख्यं गजेन्द्रस्य च मोक्षणम् ।
कार्त्तिके पठते यस्तु पुनर्जन्म न विद्यते ॥
कार्त्तिके पश्चिमे यामे स्तवं गानं करोति यः ।
वसते श्वेतद्वीपे तु पितृभिः सह नारद ! ॥
नैवेद्यदानेन तु हरेः कार्त्तिके यवसंख्यया ।
युगानि वसते स्वर्गे तावन्ति मुनिसत्तम ! ॥
अगुरुन्तु सकर्पूरं यो दहेत् केशवाग्रतः ।
कार्त्तिके तु मुनिश्रेष्ठ ! युगान्ते न पुनर्भवः" ॥

किञ्च ।

"नियमेन कथां विष्णोर्ये शृण्वन्ति च भाविताः ।
श्लोकार्द्धं श्लोकपादं वा कार्त्तिके गोशतं फलम् ॥
सर्व्वधर्म्मान् परित्यज्य कार्त्तिके केशवाग्रतः ।
शास्त्रस्योच्चारणं पुण्यं श्रोतव्यञ्च महामुने ! ॥
श्रेयसा लोभबुद्ध्या वा यः करोति हरेः कथाम् ।
कार्त्तिके मुनिशार्दूल ! कुलानां तारयेच्छतम् ॥
नित्यं शास्त्रविनोदेन कार्त्तिकं यः क्षिपेन्नरः ।
निर्द्दहेत् सर्व्वपापानि यज्ञायुतफलं लभेत् ॥
न तथा तुष्यते दानैर्न यज्ञैर्गोगजादिकैः ।
यथा शास्त्रकथालापैः कार्त्तिके मधुसूदनः ॥
कार्त्तिके मुनिशार्दूल ! यः शृणोति हरेः कथाम् ।
स निस्तरति दुर्गाणि जन्मकोटिशतानि च ॥
यः पठेत् प्रयतो नित्यं श्लोकं भागवतं मुने ! ।
अष्टादशपुराणानां कार्त्तिके फलमाप्नुयात्" ॥

किञ्च ।

"सर्व्वान् धर्म्मान् परित्यज्य इष्टापूर्त्तादिकान्नरः ।
कार्त्तिके परया भक्त्या वैष्णवैः सह संवसेत्" ॥

पाद्मे च तत्रैव ।

"कार्त्तिके भूमिशायी यो ब्रह्मचारी हविष्यभुक् ।
पलाशपत्रे भुञ्जानो दामोदरमथार्च्चयेत् ॥
स सर्व्वपातकं हित्वा वैकुण्ठे हरिसन्निधौ ।
मोदते विष्णुसदृशो भजमानन्दनिर्वृतः" ॥

किञ्च ।

"कार्त्तिकं सकलं मासं प्रातःस्नायी जितेन्द्रियः ।

जपन् हविष्यभुक् दान्तः सर्व्वपापैः प्रमुच्यते ॥
कार्त्तिकन्तु नरो मासं यः कुर्य्यादेकभोजनम् ।
शूरश्च बहुवीर्य्यश्च कीर्त्तिमांश्च स जायते" ॥

किञ्च ।

"पलाशपत्रभोजी च कार्त्तिके पुरुषो नरः ।
निष्पापः स्यात्तु नैवेद्यं हरेर्भुक्त्वा विमुच्यते ॥
मध्यस्थमैश्वरं पत्रं वर्जयेद्ब्राह्मणेतरः" ।

किञ्च ।

"अपराधसहस्राणि पातकानि महान्त्यपि ।
क्षमतेऽस्य हरिर्द्देवः पूजितः कार्त्तिके प्रभुः ॥
नैवेद्यं पायसं विष्णोः प्रियं खण्डघृतान्वितम् ।
विभज्य तच्च भुञ्जानो यज्ञसाम्यं दिने दिने" ॥

तत्रैव श्रीकृष्णसत्या संवादे ।

"स्नानं जागरणं दीपं तुलसीवनपालनम् ।
कार्त्तिके ये प्रकुर्व्वन्ति ते नरा विष्णुमूर्त्तयः ॥
इत्थं दिनत्रयमपि कार्त्तिके ये प्रकुर्व्वते ।
देवानामपि ते वन्द्याः किं यैराजन्म तत् कृतम्" ॥*

तत्रैव कार्त्तिकव्रताङ्गानि ।

"हरिजागरणं प्रातःस्नानं तुलसिसेवनम् ।
उद्यापनं दीपदानं व्रतान्येतानि कार्त्तिके" ॥

किञ्च ।

"पञ्चभिर्व्रतकैरेभिः सम्पूर्णं कार्त्तिके व्रती ।
फलमाप्नोति तत् प्रोक्तं भुक्तिमुक्तिफलप्रदम् ॥
विष्णोः शिवस्य वा कुर्य्यादालये हरिजागरम् ।
कुर्य्यादश्वत्थमूले वा तुलसीनां वनेषु च ॥
आपद्गतो यदाप्यम्भो न लभेत् सवनाय सः ।
व्याधितो वा पुनः कुर्य्याद्विष्णोर्नामापमार्ज्जनम् ॥
उद्यापनविधिं कर्त्तुमशक्तो यो व्रते स्थितः ।
ब्राह्मणान् भोजयेच्छक्त्या व्रतसम्पूर्णहेतवे ॥
अशक्तो दीपदानस्य परदीपान् प्रबोधयेत् ।
तेषां वा रक्षणं कुर्य्याद्वातादिभ्यः प्रयत्नतः ॥
अभावे तुलसीनाञ्च पूजयेद्वैष्णवं द्विजम् ।
सर्व्वाभावे व्रती कुर्य्याद्ब्राह्मणानां गवामपि ॥
सेवां वा बोधिवटयोर्व्रतसम्पूर्णहेतवे" ॥ * ॥

अथ दीपदानमाहात्म्यम् । स्कान्दे तत्रैव ।

"कृत्वा कोटिसहस्राणि पातकानि बहून्यपि ।
निमेषार्द्धेनदीपस्य विलयं यान्ति कार्त्तिके" ॥

किञ्च ।

"शृणु दीपस्य माहात्म्यं कार्त्तिके केशवप्रियम् ।
दीपदानेन विप्रेन्द्र ! न पुनर्जायते भुवि ॥
रविग्रहे कुरुक्षेत्रे नर्म्मदायां शशिग्रहे ।
तत् फलं कोटिगुणितं दीपदानेन कार्त्तिके ॥
घृतेन दीपको यस्य तिलतैलेन वा पुनः ।
ज्वलते मुनिशार्दूल ! अश्वमेधेन तस्य किम् ॥
मन्त्रहीनं क्रियाहीनं शौचहीनं जनार्द्दने ।
सर्व्वं सम्पूर्णतां याति कार्त्तिके दीपदानतः ॥
तेनेष्टं क्रतुभिः सर्व्वैः कृतं तीर्थावगाहनम् ।
दीपदानं कृतं येन कार्त्तिके केशवाग्रतः ॥
तावद्गर्ज्जन्ति पुण्यानि स्वर्गे मर्त्ये रसातले ।
यावन्न ज्वलते ज्योतिः कार्त्तिके केशवाग्रतः ॥
श्रूयते चापि पितृभिर्गाथा गीता पुरा द्विज ! ।
भविष्यति कुलेऽस्माकं पितृभक्तः सुतो भुवि ॥